**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 1
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# करणकारक-स्वरूपविवेचनम्

डॉ.अर्चना कुमारी
सहायकाचार्या, संस्कृतविभाग:-, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय:, धर्मशाला,काङ्गड़ा (.प्र.हि)

**Article Info**

Accepted : 02 Jan 2025
Published : 15 Jan 2025

**Publication Issue :**
January-February-2025
Volume 8, Issue 1

**Page Number :** 214-219

**शोधसारांश:** – भाषाविज्ञानान्तर्गतं वाक्यरचनानिमित्तं कारकस्य विशिष्टं महत्त्वं वर्तते । इत्थं तत्रादौ कारकशब्दस्य व्युत्पत्तिं प्रदर्श्य महाभाष्योक्तप्रमाणपुरस्सरं नागेशोक्तं कारकलक्षणं "क्रियानिष्पादकत्वं कारकत्वमिति" उदाहरणसहितमुपन्यस्तम् । तत: काशिकोक्तं "क्रियानिमित्तं कारकमिति" लक्षणमसङ्गतमिति प्रतिपादितम् । तदनन्तरं कारकस्य साधनत्वं साधितम् । अग्रे षट् कारकाण्युक्त्वा कारकविभक्त्यो: भेद: प्रदर्शित: । तेषु कारकेषु करणस्वरूपावबोधाय "साधकतमं करणम्" इति सूत्रस्य दीक्षितभर्तृहरिनागेशानामाचार्याणां मतानुगुणं विस्तृता व्याख्या सम्पादिता । अग्रे तमब्ग्रहणप्रयोजनविचार: प्रस्तुत: । तेन एकाधिककरणबोधकानां प्रयोग: प्रदर्शित: । "गङ्गायां घोष:" इति तमब्ग्रहणस्य फलं प्रतिपादितम् । तत: करणकारके प्रयुज्यमान: तृतीयार्थ: विभिन्नानामाचार्याणां मते उपन्यस्त: । एवमत्र समासेन करणकारकस्वरूपं विवेचितमस्ति ।

**शब्दकूटा:** – शब्द:, अर्थ:, कारकम्, साधकम्, क्रियानिष्पादकत्वम्, साधनम्, करणत्वम्, आधार:, बोधक:, तमब्ग्रहणम्, शब्दसामर्थ्य:, प्रकर्ष:, गंगायां घोष:, तृतीयाविभक्ति:, तृतीयार्थ:, कारणम्, व्यापार:, एकाधिकरणम्, आश्रय: ।

**प्रस्तावना -**

**"न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" ।** [i]

लोकेऽस्मिन् सर्वमपि ज्ञानं शब्दादेव जायते । शब्दं विना किञ्चिदपि ज्ञानं न संभवति । यद्यपि अर्थात् शब्द: भिन्न: तथापि प्रतीयमान: सर्वोपि अर्थ: शब्दानुविद्ध इव भासते । तयो: तादात्म्यात् । एवञ्च शब्दरहिता: अर्था: अत्र लोके न सन्तीति सुस्पष्टम् । एवं शब्देन प्रतीयमानस्य अर्थस्य परिसमाप्ति: वाक्यादेव जायते । तत्र च अर्थस्य स्पष्टप्रतीति: वाक्येनैव भवति । वाक्यं नाम किमिति आकाङ्क्षायाम् उच्यते - "आख्यातं साव्ययकारकविशेषणं वाक्यम्" अर्थात् अव्ययकारकविशेषणसहितं क्रियापदमेव वाक्यमुच्यते । संस्कृतव्याकरणे वाक्यविन्याससन्दर्भे कारकप्रकरणे विशिष्ट: विचार: कृत: ।

**कारकस्वरूपम्** - क्रियाया: परिनिष्पत्तौ यत् समर्थतत्त्वं तत्कारकमित्युच्यते । अत्र च डुकृञ् करणे धातो: **"ण्वुलतृचौ"**[ii]अनेन सूत्रेण कर्तरि ण्वुलि, **वोरकादेशे**[iii] गुणे कृते कारकशब्द: निष्पद्यते। पतञ्जलिना तु **"साधकं निर्वर्तकं कारकसंज्ञं भवति"**[iv] एवं कारकशब्द: प्रतिपादित: । "कारके"

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

इति महती संज्ञा । संज्ञा नाम **"यतो न लघीयः लघ्वर्थं संज्ञाकरणात्"**[v] । महत्याः संज्ञायाः करणात् **"करोति इति कारकम्"**[vi] इति कारकशब्दस्य व्युत्पत्तिलभ्योऽर्थः । तत्र करोतीत्यस्य निष्पादयति निर्वर्तयति जनयति चार्थाः प्रतिपादिताः उद्योतकारेण । तस्मात् **"क्रियाजनकत्वं कारकत्वम्"**[vii] एषः अर्थः समायाति । क्रियाजनकत्वं नाम क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वम् । जनकता कारणतास्वरूपा एव भवति सा च कारणता अन्यथासिद्धशून्यत्वे सति क्रियया अव्यवहितपूर्वक्षणावच्छेदेन विद्यमानस्वरूपा एव वर्तते । कारणता एव उत्पादकता अथवा निष्पादकता रूपेणापि कथ्यते । अतः **"क्रियानिष्पादकत्वं कारकत्वमिति"**[viii] भट्टनागेशोक्त कारकसामान्यलक्षणमपि सिद्धयति। यथा "बालःगच्छति" इत्यत्र गम् धातोः उत्तरदेशसंयोगानुकूलव्यापारः अर्थः । उत्तरदेशसंयोगानुकूलायाः क्रियायाः निष्पादकत्वात् बालस्य कारकसंज्ञा, तस्मात् **"स्वतन्त्रः कर्ता"**[ix] इत्यनेन सूत्रेण कर्तृसंज्ञा । अतः उपर्युक्तकारकलक्षणस्वीकारे "चैत्रस्य तण्डुलं पचति" इत्यादिप्रयोगस्थलेषु चैत्रस्य अन्यथासिद्धत्वे सति क्रियाजनकत्वाभावात् षष्ठयन्तचैत्रादीनां सम्बन्धपदानां न कारकसंज्ञा।

काशिकाकारस्तु क्रियानिमित्तत्वं कारकत्वमित्यर्थं स्वीकरोति । कथितं च तेन "कारकशब्दश्च निमित्तपर्यायः कारकं हेतुरित्यर्थान्तरम् । कस्य हेतुः ? क्रियायाः"[x] इति । परन्तु लक्षणमिदं न सङ्गतम् । चैत्रस्य "तण्डुलं पचति" इत्यादिप्रयोगस्थलेषु षष्ठयन्त चैत्रादिषु सम्बन्धपदेष्वपि कारकलक्षणस्यातिव्याप्तिर्भविष्यति ।

कारकं साधनमप्युच्यते।साधनशब्दस्य व्युत्पत्तिः साध्यतेऽनेन क्रिया इतिरूपेण भवति । साधनञ्च "गुणसमुदायः"[xi] अपि कथ्यते । गुणसमुदायेन अभिप्रायः शक्तिसमुदायेन वर्तते । गुणसमुदायशब्दे समुदायशब्दः करणादिसमस्तशक्तीनां प्रतीकः । करणादिशक्तयः क्रियासिद्धौ अविशेषात् निमित्तानि, अतः ताः सर्वाः शक्तयः अपि साधनम् । यथोक्तमपि – "सर्वाः शक्तयः साधनम्"[xii] इति ।

एतानि च कारकाणि षट् प्रथितानि –

"कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट्" ।।[xiii]

अत्र कर्तृकर्मादिसंज्ञाः षडपि अर्थोद्देश्यकाः । अर्थात् रामः गच्छति इत्यत्र कर्ता यः रामः दशरथपुत्रः तस्य कर्तृसंज्ञा । क्रियायां स्वातन्त्र्येण विवक्षितत्वेन तस्य कर्तृत्वेऽपि तृतीयायाः निष्पादनसामर्थ्यं नास्ति तिङा उक्तत्वात् । तत्र कर्तृत्वरूपार्थस्य प्रातिपदिकार्थत्वेन भानात् । अतः कर्तृबोधकात् रामशब्दात् प्रथमाविभक्तिः । विभक्तयस्तु कर्तृकर्मादिसंज्ञाबोधकशब्देभ्यः इति । कारकविभक्त्योः कश्चन अवश्यं ज्ञातव्यः भेदः ।

**करणस्वरूपम्** - एतेषु पाणिनिना "साधकतमं करणम्"[xiv] इति सूत्रेण करणकारकस्य स्वरूपं प्रतिपादितम् । अत्र "कारके"[xv] इत्यधिकारत्वात् क्रियासिद्धौ इत्यर्थः लभ्यते । सूत्रेऽस्मिन् साधकतमम् इति संज्ञिपदम् अर्थात् उद्देश्यं, करणम् इति संज्ञापदम् अर्थात् विधेयम् । साधयतीति साधकम् इति विग्रहे "ण्वुलतृचौ"इत्यनेन सूत्रेण स्वादिगणपठितात् संसिद्धयर्थकात् साध् धातोः कर्तरि ण्वुलि, वोरकादेशे साधकशब्दः सिध्यति । अतिशयेन साधकं साधकतमम्, अत्र "अतिशायने तमबिष्ठनौ"[xvi] इत्यनेन सूत्रेण साधकशब्दाद् अतिशायनार्थे तमप्प्रत्यये कृते साधकतमशब्दः निष्पन्नः । अतः अत्यन्तम् उपकारकं करणं साधकतममुच्यते । यथोक्तं बालमनोरमाकारेण – "कर्त्रा क्रियायां जनयितव्यायां यत् सहायभूतं तदुपकारकमित्युच्यते" ।[xvii] तस्मात् अतिशयेन साधकं साधकतमं प्रकृष्टोपकारकमित्यर्थः सिद्धयति । अत्र "यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टम्"[xviii] इति प्रकृष्टार्थः उक्तः । एवं क्रियासिद्धौ प्रकृष्टं सहायभूतं यत्कारकं तत् करणसंज्ञं भवतीति सूत्रार्थः निष्पन्नः । तथोक्तं दीक्षितेन – "क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्" इति ।[xix] यथा "नीलाभः वाहनेन गच्छति" इत्यत्र गमनक्रियासिद्धौ प्रकृष्टम् अर्थात् अत्यधिकम् उपकारकं कारकं वाहनं वर्तते अतस्तस्य वाहनस्य करणमिति संज्ञा, वाहनशब्दात् तृतीयाविभक्तिः भवति ।

भट्टनागेशः करणस्य लक्षणम् इत्थं प्रतिपादयति–"स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम्। इदमेव साधकतमत्वम्"।[xx] अर्थात् "दण्डेन घटं करोति" इत्यादिषु स्थलेषु दण्डनिष्ठव्यापाराव्यवहितकालोत्तरं घटोत्पत्तिरूपफलस्य निष्पत्तिर्दृश्यते । अतः दण्डादिषु करणत्वं फलितम् ।

**विवक्षातः कारकाणि भवन्ति** इत्युक्त्यनुसारं करणकारकमपि विवक्षाधीमनेव भवति । यथोक्तं भर्तृहरिणा – "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।

विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" ।। [xxi]

अस्यां कारिकायां 'विवक्ष्यते' इति पदेन करणकारकस्यापि विवक्षाधीनत्वं सूच्यते । फलतः स्थाल्यां पचति इत्यादिषु स्थलेष्वपि अधिकरणार्थे प्रयुक्तस्य स्थालीपदस्यापि करणविवक्षया स्थाल्या पच्यते प्रयोगः च भवति । तस्माद् उक्तं तत्त्वबोधिन्यां – "विवक्ष्यते इत्यनेन स्थाल्यादीनामपि करणत्वमस्तीति सूचितम्" ।[xxii] अतः यदा अधिकरणादिनिष्ठव्यापाराव्यवधानेन फलनिष्पत्तिर्विवक्ष्यते तदा अधिकरणादेः करणत्वं स्वीक्रियते ।

तस्मात् एवं न वक्तुं शक्यते यत् नियतरूपेण एतद्वस्तु करणम् एव भवति नान्यत् इति , अपितु विवक्षाधीनत्वात् कारकान्तरेषु अपि करणत्वम् उपपादयितुं शक्यते । भर्तृहरिः स्पष्टयति कारिकायां तद्यथा - "वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् ।

स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः" ।।[xxiii]

एवमेव सिद्धान्तलघुमञ्जूषायां प्रोक्तम् – "करणत्वं च करणताशक्तिमत्त्वम् । सा शक्तिश्च यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तन्निष्ठा"[xxiv] इति ।

कारकचक्रनामके ग्रन्थे करणस्यलक्षणम् इत्थं प्रतिपादितम् – "करणत्वञ्च कारकान्तरे चरितार्थत्वे सति हेतुत्वम्"[xxv] अर्थात् स्वभिन्नकारके चरितार्थत्वे सत्यपि यत् धात्वर्थफलस्य हेतुत्वं तत् करणत्वम् ।

**तमब्ग्रहणप्रयोजनविचारः** – ननु "साधकतमं करणम्" इति सूत्रे तमब्ग्रहणं किमर्थमिति चेदाह कौमुद्यां "गङ्गायां घोषः"[xxvi] । अत्र प्रश्नस्याशयः अस्ति यत् कारके इत्यस्य अधिकारात् साधकशब्दः कारकपरः, तेन क्रियतेऽनेनेति करणमिति व्युत्पत्त्या करणमिति महासंज्ञया साधकस्यैव करणसंज्ञा सिद्धयति । महासंज्ञाकरणं च अन्वर्थाय भवति । तेन कारकाधिकारात्महासंज्ञाकरणाच्च साधकस्य करणसंज्ञा सिध्यति । तथा सूत्रे पुनः साधकग्रहणसामर्थ्यात् अत्यन्तं साधकम् अर्थात् प्रकर्षार्थः अपि सिद्धः । तेन प्रकृष्टोपकारकस्य करणसंज्ञा स्वतः सिध्यति, अतः तमब्ग्रहणं व्यर्थम् । यथोक्तम् नागेशेन – "कारकाधिकरात्करणल्युडन्तकरणेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति प्रश्नः"[xxvii] इति । इत्थं प्रकृतसूत्रे तमब्ग्रहणं व्यर्थीभूय ज्ञापयति यत् कारकप्रकरणे "शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते"[xxviii] इति ।कैयटेनापि उक्तम् – तत्र "तमश्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेणेह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते" [xxix] तस्मात्प्रकृतसूत्रेऽपि साधकशब्दगम्यप्रकर्षार्थः न स्वीक्रियते । तमपा एव प्रकर्षार्थः आयाति अतः तमब्ग्रहणमावश्यकम् । तमप्प्रत्ययः प्रकर्षार्थस्य बोधकः । एषः प्रकर्षः अन्येषां कारकाणाम् अपेक्षया एव न तु करणान्तराणाम् अपेक्षया । यतोहि कारकसामान्यस्य बोधकस्य साधकशब्दस्य अग्रे एव तमप्प्रत्ययस्य विधानं वर्तते । अतः कारकान्तरापेक्षया एव प्रकर्षः अत्र द्योतितः । फलतः एकस्मिन् एव वाक्ये एकाधिककरणबोधकानां पदानां प्रयोगः अपि दृश्यते । अत्रोदाहरणम् – "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया"[xxx] । एवमेव "अश्वेन पथा दीपिकया व्रजतीत्यपि"[xxxi] भवति ।

तमब्ग्रहणस्य फलमुच्यते – "गङ्गायां घोषः" इति । यदि कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षार्थः स्वीक्रियते तर्हि "आधारोधिकरणम्"[xxxii] इत्यस्मिन् सूत्रेऽपि अधिक्रियन्ते क्रियाः अस्मिन् इति व्युत्पत्त्यनुसारम् अधिकरणम् इत्यन्वर्थसंज्ञया एव आधारस्य लाभे पुनराधारग्रहणसामर्थ्यात् मुख्याधारस्य प्रतीतिः भवति । तेन सर्वावयवव्याप्यस्यैव अर्थात् मुख्याधारस्यैव अधिकरणसंज्ञा भवति । यथोक्तं बालमनोरमाकारेण – "अन्यथा आधारोऽधिकरणम् इत्यत्र अन्वर्थमहासंज्ञाबलादेवाधारलाभे पुनस्तद् ग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्"[xxxiii] । तेन सर्वव्यापकस्य अभिधोक्ताधारस्यैवाधिकरण संज्ञा । यथा–हस्ते सुधाखण्डः अस्ति, तिलेषु तैलम् इत्यादीनामेव । न च "गङ्गायां घोषः","कूपे गर्गकुलमित्यादीनां" लाक्षणिकप्रयोगानाम् । यतोहि गङ्गायां घोषः न सम्भवति, गंगातटे घोषः भवति । यतोहि गङ्गायां घोषः इत्यत्र लाक्षणिकाधारत्वमस्ति अर्थात् गङ्गायाम् आधारत्वम् आरोपितम्, न तु सर्वव्याप्याधारत्वम् । तेन अधिकरणसंज्ञाभावात् सप्तमी न स्यात् । उक्तञ्च शेखरे – अधिकरणमित्यधिकरणल्युडन्तमहासञ्ज्ञयैव सिद्धे आधार ग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः

स्यात् । एवञ्चेदं सूत्रं तिलेषु तैलम् इत्यादावेव प्रवर्तेत । न हि गंगा तीरं वा सर्वावयवैर्व्याप्तम्[xxxiv] । अत: तमब्ग्रहणेन ज्ञापितं, यत् कारकप्रकरणे शब्दसामर्थ्यगम्य प्रकर्षाभावात् आधारोऽधिकरणम् इत्यस्मिन् सूत्रे आधारपदेन सर्वेषामाधाराणां ग्रहणं भवति, न केवलं सर्वावयवाधारस्य । तेन गङ्गायां घोष:, कूपे गर्गकुलम् इति सिध्यति ।

बालमनोरमाकारस्य मते तमब्ग्रहणं – "कारकप्रकरणे गौणमुख्यन्याय: एतत्सूत्रादन्यत्र न प्रवर्तते"[xxxv] इति ज्ञापयति अर्थात् "गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय:"[xxxvi] इत्येष: न्याय: "साधकतमं करणम्"अस्मिन् सूत्रे एव प्रवर्तेत यतोहि अत्र साधकतमम् अर्थात् प्रकृष्टोपकारकमेव अपेक्ष्यते । अत: अन्यत्र कुत्रापि एष: न्याय: च प्रवर्तेत । तस्मात् आधारोऽधिकरणम् अत्र सूत्रे उक्तन्यायाप्रसक्तित्वात् कारकप्रकरणे गौणमुख्यन्याय: बाधित: एतज्ज्ञापयितुमेव तमब्ग्रहणमावशयकम् ।

**तृतीयाविभक्ति:** – "कर्तृकरणयोस्तृतीया" (पा.सू. 2-3-18) इति सूत्रेण अनुक्ते कर्तरि करणे च तृतीया विधीयते । यथोक्तम् – "अनभिहिते कर्तरि करणे च तृतीया स्यात्"[xxxvii] । यथा- रामेण बाणेन हतो वाली, इत्यत्र हतो क्तप्रत्यय: कर्मणि उक्त: अत: वाली उक्त: तस्मात् अत्र प्रथमा, रामेण इति पदं कर्तृपदं बाणेन इतिपदं च करणम् एतौ अनुक्तौ तस्मादत्र प्रकृतसूत्रेण तृतीयाविभक्ति: । रूपान्तरेणापि तृतीयाविभक्ति: प्रयुज्यते । सा च "हेतौ"[xxxviii] इति सूत्रेण "हेत्वर्थे तृतीया स्यात्"[xxxix] अर्थात् कारणवाचिशब्देभ्यो तृतीयाविभक्ति: भवति । यथा धनेन कुलम् । अत्र तृतीयाया: हेतुत्वार्थ: यतोहि अत्र तृतीयाया: क्रियायामन्वय: न जात: अपितु नामार्थकुले अन्वय: । अत: क्रियान्वयित्वाभावात् न करणकारकम् । हेतुकरणयो: भेद: वर्तते । हेतु: साधारणतया द्रव्यगुणक्रियाणां सर्वेषामपि जनक: भवितुमर्हति तत्र व्यापार: न अपेक्षित: यथोक्तम् – "द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्"[xl] । परञ्च करणं क्रियाया: एव निमित्तं भवति तथा तस्मिन् नियतरूपेण क्रियासाधकव्यापार: भवति । उक्तमपि - "करणत्वं तु क्रियामात्रविषयं च"[xli]। यथा बाणेन हतो वाली अत्रोदाहरणे बाण रूपीकरणे हननक्रियाया: साधकव्यापार: विद्यते । परञ्च विद्यया यश: इत्यत्र विद्यायां व्यापार: वर्तते । परञ्च क्रियाजनकत्वं नास्ति तस्मादत्र हेत्वर्थे तृतीया । हेतो: अन्यानि उदाहरणानि यथा–पुत्रेण हर्ष:, दण्डेन घट:, पुण्येन दृष्टो हरि: इत्यादीनि ।

**करणकारके प्रयुज्यमान:तृतीयार्थ:** – **नागेशभट्ट:** करणे प्रयुज्यमानाया: तृतीयाया: करणत्वशक्तिमान् इत्यर्थं स्वीकरोति तथा क्रियाकरणभाव: सम्बन्धश्च अर्थ: इति स्वीकरोति । सा च करणत्वशक्ति: व्यापारवत्ता एव मन्यते । उक्तञ्च तेन – "करणतृतीयाया: करणत्वशक्तिमान् क्रियाकरणभाव: सम्बन्धश्चार्थ: । तच्छक्तिमत्त्वञ्च व्यापारवत्त्येव"[xlii] । यथा "रामेण बाणेन हतो वाली" इत्यत्र हन्धातो: प्राणवियोगानुकूलव्यापार: अर्थ: तथा बाणनिष्ठव्यापारदव्यवहितोत्तरं प्राणवियोगाद् बाणस्य करणत्वं, तस्मात् बाण शब्दात् करणे तृतीया । अत्र हि रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो यो बाणनिष्ठो व्यापारस्तज्जन्यं यत्प्राणवियोगरूपं फलं, तदाश्रयो वाली एवं पूर्वं शाब्दबोध: भवति । तथा रामव्यापारप्रयोज्यबाणनिष्ठव्यापार: इति शाब्दबोध: अनन्तरं भवति ।

**भूषणकारेण** करणे तृतीयार्थ: आश्रयव्यापारौ मन्यते । कथितञ्च तेन – "करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ"[xliii] इति । इतोपि स्पष्टयति कारिकया –

"आश्रयोऽवधिरुद्देश्य: सम्बन्ध: शक्तिरेव वा ।
यथायथं विभक्त्यर्था: सुपां कर्मेति भाष्यत:" ।।[xliv]

कारिकायां निहित: आश्रय: इति पदं व्यापारस्य उपलक्षणम् । प्रमाणं चात्र कौण्डभट्ट: – "साधकतमं करणम्, तमबर्थ: प्रकर्ष: । स चाव्यवधानेन फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणञ्च करणम्" ।[xlv] इत्थं "रामेण बाणेन हतो वाली", अत्र बाणस्य अभेदेन तृतीयार्थे आश्रये तस्य आश्रयस्य आधेयतासम्बन्धेन द्वितीयतृतीयार्थव्यापारे तस्य व्यापारस्य जन्यत्वसम्बन्धेन प्राणवियोगरूपफले तस्य च फलस्य आश्रयतासम्बन्धेन वाली इतिपदे अन्वय: भवति । एतस्मात् – "रामाभिन्नाश्रयवृत्तिव्यापारजन्यो बाणभिन्नाश्रयवृत्तिव्यापारजन्यश्च य: प्राणवियोगस्तदाश्रयो वाली" इति शाब्दबोध: भवति ।

**व्युत्पत्तिवादे** करणत्वतृतीयार्थे एवमुक्तम् – "काष्ठेन पचति, इत्यादौ करणत्वं तृतीयार्थः तच्च व्यापारवत्कारणत्वं व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम् अन्यथा कर्तुरपि करणतापत्त्या चैत्रश्चेत्रेण पचति, काष्ठं चैत्रेण पचति इत्यादिप्रयोगापत्तेः" ।[xlvi] अतः एतेषां मते करणस्य लक्षणमित्थमुक्तम् – "स्वभिन्नकर्तृव्यापाराधीनव्यापारवत्कारणत्वं करणत्वम्"[xlvii] इति ।

**नैयायिकास्तु**"असाधारणं कारणं करणम्"[xlviii] इति लक्षणं स्वीकुर्वन्ति । कारणे असाधारणं व्यापारत्वमेव मन्यते फलतः व्यापारवदसाधारणं कारणं करणम् इति लक्षणं निष्पन्नम् । व्यापारस्य लक्षणमस्ति – "तज्जन्यवत्वे सति तज्जन्यजनकत्वं"[xlix] इति फलतः करणतृतीयायाः व्यापारमात्रार्थं स्वीकुर्वन्ति ।

**सारमञ्जरीकारस्तु** कथयति यत् अन्येषां कारकाणां सहकारितया विनैव यत् फलस्य हेतुर्भवति तत् साधकतमं कथ्यते तथा साधकतममेव करणम् । उक्तञ्च तेन – "साधकतमञ्च कारकान्तरासहकृतत्वे सति फलहेतुत्वं कारकान्तरव्यापारमनुत्पाद्य फलहेतुत्वमित्यर्थः"[l] । धात्वर्थतायाः अवच्छेदकमेव फलमुच्यते । यथा - परशुना वृक्षं छिनत्ति । अत्र द्वैधीभावरूपफलं करणातिरिक्तकारकाणां सहकारितया विनैव परशुना सम्पन्नं भवति । अतः साधकतमे सति करणम् । अत्र परशुपदोत्तर तृतीयार्थः करणत्वमेव । एवमेव मनसा पाटलिपुत्रनगरं गच्छति इत्यादिषु स्थलेषु अमूर्तं मनः अपि कारकान्तरसहकारेण विनैव गमनक्रियायाः निष्पत्तौ करणकारकं भवति ।

**निष्कर्षः**- इत्थं सर्वेषां मते यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टम्, एवं क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं भवतति । तथा कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षः नाश्रीयते इति । सः च प्रकर्षार्थः तमपा एव आयाति । पुनश्च एषः प्रकर्षः कारकान्तरापेक्षया एव भवति,न तु करणकारकापेक्षया। अतः सारांशेन इदं वक्तुं शक्यते यत् करणकारकं केषाञ्चिदपि अन्येषां कर्मादिकारकाणां विषयः न भवति । तदपेक्षया अन्यानि कर्मादिकारकाणि करणस्य विषयाः भवन्ति एतत् करणकारकस्य अन्येषां कारकाणाम् अपेक्षया वैशिष्ट्यमिति शम् ।

**सन्दर्भग्रन्थसूची –**


1. पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 ।
2. पतञ्जलिः। व्याकरणमहाभाष्यम् । भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 ।
3. दीक्षितः, भट्टोजिः ।वैयाकरणसिद्धान्तकौमुदी । पाण्डेयः गोपालदत्तः,व्याख्याकारः । चौखम्बासुरभारतीप्रकाशनं वाराणसी, 2017 ।
4. भर्तृहरिः । वाक्यपदीयम्, ब्रह्मकाण्डम् । शुक्लः सूर्यनारायणः, भावप्रदीपव्याख्या । चौखम्बा संस्कृत संस्थान वाराणसी, वि. सं. 2055 (1998) ।
5. भट्टः, नागेशः । परमलघुमञ्जूषा । लोकमणिदाहालः, किरणावली संस्कृतव्याख्योपत हिन्द्यनुवादसहिता । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 ।
6. जयादित्यः, वामनः। काशिका । मिश्रः नारायणः, प्रकाशहिन्दीव्याख्योपेता । चौखम्बासंस्कृतसंस्थानं वाराणसी, 2001 ।
7. भट्टः नागेशः । लघुशब्देन्दुशेखरः। मिश्रः भैरवः, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथः, वैकुण्ठी हिन्दीव्याख्या । चौखम्बासुरभारती प्रकाशनं वाराणसी ,2006 ।
8. वरदराजः । लघुसिद्धान्तकौमुदी । शास्त्री, भीमसेनः । भैमीव्याख्या, तृतीयभागः । भैमीप्रकाशनम् । 2015 ।
9. भट्टः नागेशः । परिभाषेन्दुशेखरः । मिश्रः, विश्वनाथः, सुबोधिनीहिन्दीव्याख्योपेतः। चौखम्बासुरभारती प्रकाशनं वाराणसी, 2005 ।
10. दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । दीक्षितः वासुदेवः, बालमनोरमाव्याख्या । पाण्डेयःगोपालदत्तः,दीपिकाहिन्दीव्याख्योपेता । चौखम्बा सुरभारती प्रकाशन वाराणसी, 2007 ।
11. दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । सरस्वती, ज्ञानेन्द्रः । दीक्षितः वासुदेवः । तत्त्वबोधिनीबालमनोरमासहिता, प्रथमो भागः। चतुर्वेदः गिरिधरशर्मा । विद्याभास्करः परमेश्वरानन्दशर्मा । सम्पादकौ । मोतीलालबनारसीदास वाराणसी, 1991 ।

12. मङ्गलाराम । संस्कृत व्याकरण की दार्शनिक मीमांसा । राजस्थानीग्रन्थागारजोधपुर, 1995 ।

13. भट्टः अन्नम् । तर्कसंग्रहः । तर्कसंग्रहदीपिका- न्यायवोधिनी- पदकृत्य, श्रीनिवास मुखोल्लासिनी संस्कृतहिन्दीव्याख्यासंवलित । गोविन्दाचार्यः, सम्पादकः । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 ।

14. श्रीमद्भगवद्गीता ।गीताप्रेस गोरखपुर, - 273005 । गोविन्दभवन कार्यालय, कोलकत्ता संस्थान । सं. 2075 अस्सीवाँ पुनर्मुद्रणम् ।

15. भट्टः कौण्डः । वैयाकरणभूषणसारः । हरिवल्लभः, दर्पणव्याख्या । द्विवेदी चन्द्रिकाप्रसादः , सुबोधिनी – हिन्दीव्याख्योपेतश्च । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2005 ।

16. भट्टाचार्यः, गदाधरः । व्युत्पत्तिवादः । तिवारीहरिनारायणः । तत्त्वबोधिनीसंस्कृतटीका एवं हिन्दी व्याख्यासहिता । चौखम्बाविद्याभवनं वाराणसी । 2005 ।

17. दीक्षितः भट्टोजिः । प्रौढमनोरमा ।भैरवीव्याख्यासहिता, चौखम्बासंस्कृतसंस्थानं वाराणसी, तृतीयसंस्करणम्, वि. सं. 2059 ।

18. भट्टः नागेशः । सिद्धान्तलघुमञ्जूषा । भट्टः नागेशः, नागेशभावप्रकाशः, सुबर्थवादः । महामहोपाध्याय पेरिसूर्यनारायणशास्त्री, सम्पादकः 1992 ।

19. रामचन्द्रः । प्रक्रियाकौमुदी, द्वितीयो भागः । पण्डितः कृष्णः, प्रकाशव्याख्योपेता । मिश्रः मुरलीधरः , सम्पादकः । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी । द्वितीयं संस्करणम् । 2000 ।

20. भर्तृहरिः, वाक्यपदीयम् । तृतीयं काण्डम्, द्वितीयो भागः । पद्मश्री शर्मा, पण्डितश्रीरघुनाथः, अम्बाकर्त्रीव्याख्याकारः सम्पादकश्च । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, 2016 ।

---

i.भर्तृहरिः । वाक्यपदीयम्, ब्रह्मकाण्डम् । शुक्लः, सूर्यनारायणः ।भावप्रदीपव्याख्या ।
चौखम्बा संस्कृत संस्थान वाराणसी, वि. सं. 2055 (1998) । श्लोक सं – 123, पृ. सं. 133 ।

ii.पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 ।पा.सू. 3-1-133 ।

iii.दीक्षितः, भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । पाण्डेयः गोपालदत्तः, व्याख्याकारः । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 ।
"युवोरनाकौ" (पा. सू. 7-1-1) यु वु एतयोरनुनासिकयोःक्रमाद् अन अक एतावादेशौ स्तः । इति वैयाकरणसिद्धान्तकौमुदी ।

iv.पतञ्जलिः। व्याकरणमहाभाष्यम् । भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 । 1.4.3 कारके सूत्रे ।पृ. सं. 242 ।

v.तत्रैव ।

vi.तत्रैव ।

vii.वरदराजः । लघुसिद्धान्तकौमुदी । शास्त्री, भीमसेनः । भैमीव्याख्या, तृतीयभागः । भैमी प्रकाशनम् । 2015 । पृष्ठ सं – 295 ।

viii.भट्टः, नागेशः । परमलघुमञ्जूषा । लोकमणिदाहालः, किरणावली संस्कृतव्याख्योपत हिन्द्यनुवादसहिता ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 ।कारकनिरूपणम्, मूलम्, पृ. सं – 252 ।

ix.पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 । पा. सू. 1-4-54 ।

x.जयादित्यः । वामनः। काशिका । मिश्रः नारायणः, प्रकाशहिन्दीव्याख्योपेता ।
चौखम्बासंस्कृतसंस्थानं वाराणसी, 2001 ।1-4-23 सूत्रस्य मूलम् । पृष्ठ सं – 70 ।

xi.पतञ्जलिः। व्याकरणमहाभाष्यम् । भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः ।
चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 । महाभाष्यम् , 3.2.115 परोक्षे लिट् सूत्रे ।यदि तावद् गुणसमुदायः साधनम् । साधनमप्यनुमानगम्यम् ।

xii.तत्रैव प्रदीपः, 3.2.115 ।

xiii.भट्टः, नागेशः । परमलघुमञ्जूषा । लोकमणिदाहालः, किरणावली संस्कृतव्याख्योपत हिन्द्यनुवादसहिता ।

चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 ।कारकनिरूपणम्, मूलम्, पृ. सं - 252 ।
xiv.पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017। पा.सू. 1-4-42
xv.तत्रैव । पा. सू. 1-4-23 ।
xvi.तत्रैव । पा. सू. 5-3-55 ।
xvii.दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । दीक्षितः वासुदेवः, बालमनोरमाव्याख्या । पाण्डेयः गोपालदत्तः, दीपिकाहिन्दीव्याख्योपेता ।
चौखम्बा सुरभारती प्रकाशन वाराणसी, 2007 । पृ सं - 731 ।
xviii.भट्टः नागेशः । लघुशब्देन्दुशेखरः। मिश्रः भैरवः, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथः, वैकुण्ठी हिन्दीव्याख्या ।
चौखम्बासुरभारती प्रकाशनं वाराणसी ,2006 । पृ. सं. - 735 ।
xix.दीक्षितः, भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । पाण्डेयः गोपालदत्तः, व्याख्याकारः ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 । कारकप्रकरणम्, मूलमात्रम् , साधकतमम् करणम् सूत्रस्य वृत्तिः, पृष्ठ सं. - 341
xx.भट्टः, नागेशः । परमलघुमञ्जूषा । लोकमणिदाहालः, किरणावली संस्कृतव्याख्योपत हिन्द्यनुवादसहिता ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 । कारकनिरूपणम्, पृ. सं. - 271
xxi.भर्तृहरिः, वाक्यपदीयम् । तृतीयं काण्डम्, द्वितीयो भागः । पद्मश्री शर्मा, पण्डितश्रीरघुनाथः, अम्बाकर्त्रीव्याख्याकारः सम्पादकश्च ।
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, 2016 । साधनसमुद्देशः, 3-7-90, पृ. सं. 273 ।
xxii.दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । सरस्वती, ज्ञानेन्द्रः । दीक्षितः वासुदेवः । तत्त्वबोधिनीबालमनोरमासहिता, प्रथमो भागः। चतुर्वेदः गिरिधरशर्मा । विद्याभास्करः परमेश्वरानन्दशर्मा । सम्पादकौ । मोतीलालबनारसीदास वाराणसी, 1991 । प्रथमो भागः, पृष्ठ सं. - 633 ।
xxiii.भर्तृहरिः, वाक्यपदीयम् । तृतीयं काण्डम्, द्वितीयो भागः । पद्मश्री शर्मा, पण्डितश्रीरघुनाथः, अम्बाकर्त्रीव्याख्याकारः सम्पादकश्च ।
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, 2016 । साधनसमुद्देशः, 3-7-91, पृ. सं. 274 ।
xxiv.भट्टः नागेशः । सिद्धान्तलघुमञ्जूषा । भट्टः नागेशः, नागेशभावप्रकाशः, सुबर्थवादः ।
महामहोपाध्याय पेरिसूर्यनारायणशास्त्री, सम्पादकः 1992 । सुबर्थवादे तृतीयार्थविचारः, पृ. सं. 157 ।
xxv.मङ्गलाराम । संस्कृत व्याकरण की दार्शनिक मीमांसा। राजस्थानीग्रन्थागारजोधपुर, 1995 ।अध्याय 4 कारक विचार, पृ.सं. 88 ।
xxvi.दीक्षितः, भट्टोजिः। वैयाकरणसिद्धान्तकौमुदी। पाण्डेयः गोपालदत्तः, व्याख्याकारः ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017। साधकतमं सूत्रस्थ मूलम्, पृष्ट. सं. 84 ।
xxvii.भट्टः नागेशः। लघुशब्देन्दुशेखरः। मिश्रः भैरवः, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथः, वैकुण्ठी हिन्दीव्याख्या ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 ।कारकप्रकरणम् ,मूलम् ,पृष्ट. सं. 735 ।
xxviii.तत्रैव पृष्ट. सं. 736 ।
xxix.पतञ्जलिः। व्याकरणमहाभाष्यम् । भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः ।
चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 । 1 अ. 4 पा. 3 आ. , साधकतमं करणम् सूत्रस्थ, प्रदीपः ,पृष्ट. सं. 259 ।
xxx.श्रीमद्भगवद्गीता । गीताप्रेस गोरखपुर, - 273005 । गोविन्दभवन कार्यालय, कोलकत्ता संस्थान । सं. 2075 अस्सीवाँ पुनर्मुद्रणम् । 4 अ. , श्लोकसं. 34 ।
xxxi.भट्टः नागेशः । सिद्धान्तलघुमञ्जूषा । भट्टः नागेशः, नागेशभावप्रकाशः, सुबर्थवादः ।
महामहोपाध्याय पेरिसूर्यनारायणशास्त्री, सम्पादकः 1992 । सुबर्थवादे तृतीयार्थविचारः, पृ. सं. 158 ।
xxxii.पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 ।पा.सू. (1-4-45)
xxxiii.दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । दीक्षितः वासुदेवः, बालमनोरमाव्याख्या । पाण्डेयः गोपालदत्तः, दीपिकाहिन्दीव्याख्योपेता ।
चौखम्बा सुरभारती प्रकाशन वाराणसी, 2007 । पृष्ट. सं. 731
xxxiv.भट्टः नागेशः । लघुशब्देन्दुशेखरः। मिश्रः भैरवः, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथः, वैकुण्ठी हिन्दीव्याख्या ।

चौखम्बासुरभारती प्रकाशनं वाराणसी ,2006 । कारकप्रकरणम् मूलम् पृष्ट. सं. 735
xxxv.दीक्षितः भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । दीक्षितः वासुदेवः, बालमनोरमाव्याख्या । पाण्डेयः गोपालदत्तः, दीपिकाहिन्दीव्याख्योपेता ।
चौखम्बा सुरभारती प्रकाशन वाराणसी, 2007 ।पृ सं – 731 ।
xxxvi.भट्टः नागेशः । परिभाषेन्दुशेखरः । मिश्रः, विश्वनाथः, सुबोधिनीहिन्दीव्याख्योपेतः।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2005 । शास्त्रत्वसम्पादकप्रकरणम् ,परिभाषा – 15 , पृष्ट. सं. –70 ।
xxxvii.दीक्षितः, भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । पाण्डेयः गोपालदत्तः, व्याख्याकारः ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 । कारकप्रकरणम्, कर्तृकरणयोस्तृतीया इति सूत्रस्य मूलम्, पृ सं 84
xxxviii.पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 ।पा. सू. 2–3–23
xxxix.दीक्षितः, भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । पाण्डेयः गोपालदत्तः, व्याख्याकारः ।
चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 । कारकप्रकरणम्, हेतौ, सूत्रस्य वृत्ति पृ सू. 84
xl.तत्रैव ।
xli.तत्रैव ।
xlii.भट्टः नागेशः । लघुशब्देन्दुशेखरः। मिश्रः भैरवः, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथः, वैकुण्ठी हिन्दीव्याख्या ।
चौखम्बासुरभारती प्रकाशनं वाराणसी ,2006 । कारकप्रकरणम् पृ.सं. 737
xliii.भट्टः कौण्डः । वैयाकरणभूषणसारः । हरिवल्लभः, दर्पणव्याख्या । द्विवेदी चन्द्रिकाप्रसादः , सुबोधिनी – हिन्दीव्याख्योपेतश्च ।
चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2005 । सुबर्थनिर्णयः, पृष्ठ सं. 171 ।
xliv.तदेव पृष्ठ सं. 145 ।
xlv.तदेव पृष्ठ सं. 171 ।
xlvi.भट्टाचार्यः, गदाधरः । व्युत्पत्तिवादः । तिवारी हरिनारायणः । तत्त्वबोधिनी संस्कृतटीका एवं हिन्दी व्याख्यासहिता ।
चौखम्बाविद्याभवनं वाराणसी । 2005 ।तृतीयाकारकम्, मूलम्, पृ सं 542 ।
xlvii.तदेव, हिन्दीव्याख्या, पृ सं 543 ।
xlviii.भट्टः अन्नम् । तर्कसंग्रहः । तर्कसंग्रहदीपिका– न्यायवोधिनी– पदकृत्य, श्रीनिवास मुखोल्लासिनी संस्कृतहिन्दीव्याख्यासंवलित ।
गोविन्दाचार्यः, सम्पादकः । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 । कारकनिरुपणम्, पृ. सं. – 133 ।
xlix.तदेव, पृष्ठ सं. 135
l.मङ्गलाराम । संस्कृत व्याकरण की दार्शनिक मीमांसा । राजस्थानीग्रन्थागारजोधपुर, 1995 । अध्याय 4 कारक विचार, पृ.सं. 104 ।